Total Page - 4 UG/3rd Sem/SAN(H)/T/19

MIDNAPORE CITY COLLEGE
LIBRARY
ESTD.-2017

2019

B.A.

3rd Semester Examination

# SANSKRIT (Honours)

## Paper - C 6-T

Full Marks : 60 Time : 3 Hours

*The question are of equal value for any group/half. The figures in the margin indicate full Marks. Candidates are required to give their answers in their own words as far as practiable. Illustrate the answers wherever necessary.*

1. यथेप्सितानां दशप्रश्नानाम् उत्तरं दीयताम् सुरगिरा नागर्या च। 2 × 10

(i) किं नाम अलङ्कारशास्त्रम्? कविना सह कस्यचित् चतुष्टयस्य अलङ्कारशास्त्रम्? कविना सह कस्यचित् चतुष्टयस्य अलङ्कारप्रस्थानस्य नाम कार्यम्।

(ii) दृश्यकाव्यं किम्? तच्च कतिविधं किञ्च?

(iii) किं नाम चम्पूकाव्यम्? कस्यचित् चम्पूकाव्यत्रयस्य कविना सह नाम उल्लेख्यताम्।

(iv) महाकाव्ये कः नायकः भवति? तत्र सर्गसंख्या का मुख्यरसश्च कः भवति?

[ Turn Over ]

(v) 'भारती कवेर्जयति'—कविभारती कथं जयति?

(vi) मम्मटस्य काव्यशास्त्रग्रन्थः कः भवति? मम्मटदिशा काव्यकारणानि कानि भवन्ति?

(vii) साहित्यदर्पणः केन विरचितः? साहित्यदर्पणानुसारं काव्यसंज्ञा प्रदेया।

(viii) कः नामधेयः भरतप्रणीतः अलङ्कारग्रन्थः? किञ्च तावत् भरतप्रणीतं रससूत्रम्?

(ix) भरतस्य रससूत्रमाश्रित्य उत्थापितानां मतवादानां कविना सह नाम कार्यम्।

(x) शब्दस्य शक्तयः कतिविधाः भवन्ति? काश्च ताः? का नाम अभिधा वृत्तिः?

(xi) ध्वनिप्रस्थानस्य प्रवक्ता कः भवति? कश्च तस्य ग्रन्थः?

(xii) छन्दोशास्त्रस्य आदि प्रवक्ता कः आसीत्? कश्च तस्य ग्रन्थः? किं तावत् छन्दः?

(xiii) 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये'—निर्णयपूर्वकं चरणस्य छन्दसः नाम कार्यम्।

(xiv) कः तावत् शब्दालङ्कारः? द्वयोः शब्दालङ्कारयोः नाम कार्यम्।

(xv) उपमानोपमेययोः अभेदे कः अलङ्कारः भवति? दृष्टान्तः प्रदेयः।

423/9/128-3500

2. यथेप्सितानां चतुर्णां प्रश्नानाम् उत्तरं देयम। तेषु च कस्यापि एकस्य प्रश्नस्य उत्तरं सुरगिरा देवनागर्य्या च साधनीयम्— 5 × 4

(क) अधोलिखितेषु कस्यापि एकस्य टीका रचनीया—
कायकल्पः, वामनः, काव्यालङ्कारः।

(ख) कस्यचिदेकस्य छन्दसः संज्ञया सह उदाहरणं प्रदेयम्—
आर्या, द्रुतविलम्बितम्, मालिनी।

(ग) यतिस्थानं निर्दिश्य कस्यापि एकस्य चरणस्य छन्दः निर्णेयम्—

(i) कश्चित्कान्ता विरहगुरुणा स्वाधिकारः प्रमत्तः।

(ii) सदालोके सूक्ष्मं व्रजति सहसा तद्विपुलताम्।

(घ) कस्यचिदेकस्य अलङ्कारस्य सोदाहरणं लक्षणं प्रदेयम्—
अनुप्रासः, रूपकम्, दीपकम्।

(ङ) कस्यचिदेकस्य श्लोकस्य अलङ्कारः निर्णेयः संज्ञया सह—

(i) अधरः किसलयरागः कोमलविटपानुकारिणौ वाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥

(ii) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

(च) कस्यापि द्वयस्य परिचयः प्रदेयः—
धीरोदात्तः, शृङ्गाररसः, लक्षणा, व्यक्तिविवेकः, कुन्तकः।

*[ Turn Over ]*

3. कस्यापि प्रश्नद्वयस्य उत्तरं प्रदेयम्— 10 × 2

(क) मम्मटानुसारं काव्यप्रयोजनं व्याख्येयम्।

(ख) भट्टलोल्लटस्य उत्पत्तिवादः सयुक्तिकं पर्यालोचनीयः।

(ग) सदृष्टान्तं साहित्यदर्पणानुसारं नाटकलक्षणं प्रतिपाद्यताम्।

(घ) गद्यं किम्? तत् सामान्यतः कतिविधम्? तत्र कथाख्यायिकयोः को भेदः स्पष्टीक्रियताम्।

---